A

Booklet Series **A**

**Code : PG-15**

Question Booklet No.
प्रश्न पुस्तिका संख्या
7138241

परीक्षा केन्द्र की मुहर लगायें
Affix stamp of examination centre

# संस्कृत
# SANSKRIT

अनुक्रमांक (अंकों में)
Roll No. (in figures) ____________
(केवल अंग्रेजी में/Only in English)

OMR क्रम संख्या (अंकों में)
OMR Serial No. (in figures) ____________
(केवल अंग्रेजी में/Only in English)

OMR क्रम संख्या (शब्दों में)
OMR Serial No. (in words) ..............................................................

..............................................................

केन्द्र का नाम/Name of the Centre ..............................................................

SEAL

समय : 2 घंटे | Time : 2 Hours

पूर्णांक : 425 | M.M. : 425

कक्ष-निरीक्षक का हस्ताक्षर/Signature of the Invigilator

## आवश्यक निर्देश

1. अभ्यर्थी अपना अनुक्रमांक केवल आवरण पृष्ठ तथा प्रश्न-पुस्तिका के साथ दिए गए OMR उत्तर-पत्रक के निर्दिष्ट स्थान पर लिखेंगे, अन्यत्र कहीं नहीं ।
2. प्रश्न-पुस्तिका मिलने के उपरान्त अभ्यर्थी को तुरन्त जाँच कर सुनिश्चित कर लेना चाहिए कि पुस्तिका में पूरे पृष्ठ हैं तथा कोई प्रश्न छूट तो नहीं गया है । यदि कोई विसंगति है, तो प्रश्न-पुस्तिका मिलने के 10 मिनट के भीतर ही कक्ष-निरीक्षक को सूचित करना चाहिए तथा त्रुटिरहित दूसरी पुस्तिका प्राप्त कर लेनी चाहिए ।

## IMPORTANT INSTRUCTIONS

1. The candidate will write his/her Roll No. only at the place provided for i.e. on the cover page and on OMR answer sheet given and nowhere else.
2. Immediately on the receipt of the question booklet, the candidate will check up and ensure that it contains all the pages and that no question is missing. If there is any discrepancy, it should be reported by the candidate to the invigilator within 10 minutes of issue of this question booklet and a fresh booklet without any discrepancy be obtained.

*

DO NOT WRITE HERE

SEAL

रफ कार्य के लिए जगह

**Space for Rough Work**



SEAL

# संस्कृत
# SANSKRIT

1. आचार्यमम्मटस्य मतानुसारं, काव्यशास्त्रे 'ध्वनि' रिति शब्दः कुत आगतः ?

   (A) न्यायशास्त्रात्

   (B) सांख्यशास्त्रात्

   (C) व्याकरणशास्त्रात्

   (D) मीमांसाशास्त्रात्

2. कस्मिनुदाहरणे चतुर्थी विभक्तिः ?

   (A) अश्वात् बालकः अपतत्।

   (B) बालकः दुर्जनात् बिभेति।

   (C) तस्यै कन्यायै फलं यच्छ।

   (D) का कन्यां पश्यसि ?

3. भगवद्गीतानुसारेण रजोगुणात् संजायते

   (A) लोभः

   (B) प्रमादः

   (C) मोहः

   (D) अज्ञानम्

4. 'शरीरभाजां भवदीयदर्शनं व्यनक्ति कालत्रितयेऽपि योग्यताम्' इतीदं वचनमस्ति

   (A) शिशुपालवधे श्रीकृष्णस्य नारदं प्रति

   (B) शिशुपालवधे नारदस्य श्रीकृष्णं प्रति

   (C) अभिज्ञानशाकुन्तले अनसूयायाः दुर्वाससं प्रति

   (D) कुमारसंभवे पार्वत्याः महादेवं प्रति

5. 'दीर्घसक्थः' इत्यस्मिन् उदाहरणे शुद्धो विग्रहो वर्तते ?

   (A) दीर्घौ सक्थौ यस्य सः

   (B) दीर्घाः सक्थाः यस्य सः

   (C) दीर्घे सक्थिनी यस्य सः

   (D) दीर्घे सक्थि यस्य सः

6. वेदान्तमतेन अज्ञानं नास्ति

   (A) त्रिगुणात्मकम्

   (B) सदसद्भ्यामनिर्वचनीयम्

   (C) अभावरूपम्

   (D) भावरूपम्

7. कः 'अन्यादृश एव लोकपालः अपूर्वो विबुधपतिः अदण्डकरो धर्मराजः, अजधन्यः प्रचेताः' ?

   (A) नलः

   (B) शूद्रकः

   (C) चन्द्रापीडः

   (D) तारापीडः

8. न्यायः कुत्र प्रवर्तते ?

   (A) उपलब्धेऽर्थे

   (B) अनुपलब्धेऽर्थे

   (C) निर्णीतेऽर्थे

   (D) सन्दिग्धेऽर्थे

9. काव्यप्रकाशे 'उपकृतं बहु तत्र किमुच्यते सुजनता प्रथिता भवता परम्.' इति श्लोको निर्दिष्ट उदाहरणरूपेण

   (A) अर्थान्तरसंक्रमितवाच्यध्वनेः

   (B) अत्यन्ततिरस्कृतवाच्यध्वनेः

   (C) संलक्ष्यक्रमव्यङ्ग्यध्वनेः

   (D) असंलक्ष्यक्रमव्यङ्ग्यध्वनेः

10. न्यायसूत्रानुसारेण प्रमाणानि सन्ति–
   (A) प्रत्यक्षानुमानोपमानशब्दा:
   (B) प्रमाया: कारणानि बहूनि सन्ति
   (C) योग्यता च गुणानामत्यन्ताभावाभाव:
   (D) प्रमात्रादिभ्योऽतिशयितत्वादतिशयितं

11. 'रमणीय: खल्ववधिर्विधिना विसंवादित:' कस्येयमुक्ति: ?
   (A) मधुकरिकाया:
   (B) परभृतिकाया:
   (C) सानुमत्या:
   (D) प्रियम्वदाया:

12. काव्यस्य षड्विधं प्रयोजनं कस्मिन् काव्यग्रन्थे उक्तम् ?
   (A) काव्यालंकारे
   (B) वक्रोक्तिजीविते
   (C) साहित्यदर्पणे
   (D) काव्यप्रकाशे

13. अभिज्ञानशाकुन्तलमिति नाटके नान्दी अस्ति–
   (A) अष्टापदा (B) द्वादशापदा
   (C) त्रयोदशापदा (D) अष्टादशापदा

14. स्रष्टु: आद्या सृष्टि: का ?
   (A) आकाश: (B) अग्नि:
   (C) जलम् (D) पृथिवी

15. विरतास्वभिधाद्यासु ययाऽर्थो बोध्यते पर:, सा वृत्ति: अस्ति–
   (A) तात्पर्या (B) लक्षणा
   (C) अभिधा (D) व्यञ्जना

16. ध्वनिपरिवर्तनस्य आभ्यन्तरकारणं नास्ति।
   (A) लिपिदोष:
   (B) प्रयत्नलाघवम्
   (C) काव्यात्मकता
   (D) बलाघात:

17. फक्प्रत्यययोगाद् निष्पन्नं पदमस्ति
   (A) दाक्षि: (B) औडुलोमि:
   (C) गार्ग्यायण: (D) गाङ्ग:

18. बलवदपि शिक्षितानामात्मन्यप्रत्ययं चेत:–इति सुभाषितवचनं कस्मिन् ग्रन्थेऽस्ति ?
   (A) दशकुमारचरिते
   (B) शिशुपालवधे
   (C) अभिज्ञानशाकुन्तले
   (D) मृच्छकटिके

19. 'यादवाभ्युदयम्' कस्य रचना वर्तते ?
   (A) वेदान्तदेशिकस्य (B) वस्तुपालस्य
   (C) मातृगुप्तस्य (D) भर्तृमेण्ठस्य

20. 'रणद्भिराघट्टनया नमस्वत: पृथग्विभिन्नश्रुतिमण्डलै: स्वरै:' – श्लोकांशेऽस्मिन् 'नमस्वत:' इति पदस्यार्थोऽस्ति
   (A) आकाशस्य (B) मेघस्य
   (C) सूर्यस्य (D) वायो:

21. वाच्य एव वाक्यार्थ: इति केषाम् आचार्याणां मतम् ?
   (A) अभिहितान्वयवादिनाम्
   (B) ध्वनिवादिनाम्
   (C) रीतिवादिनाम्
   (D) अन्विताभिधानवादिनाम्

22. सांख्यकारिकानुसारेण पुरुषबहुत्वमनुमीयते-

(A) संघातपरार्थत्वात्

(B) कैवल्यार्थं प्रवृत्तेः

(C) भोक्तृभावात्

(D) अयुगपत्प्रवृत्तेः

23. काव्यप्रकाशानुसारं, परिसंख्याऽलङ्कारस्य कियन्तो भेदाः ?

(A) त्रयः

(B) षट्

(C) चत्वारः

(D) अष्टौ

24. कादम्बरी-कथामुखमिति ग्रन्थस्य मङ्गलाचरणमस्ति

(A) वागर्थाविव सम्पृक्तौ वागर्थ....

(B) रजोजुषे जन्मनि सत्त्ववृत्तये स्थितौ....

(C) श्रियः कुरूणामधिपस्य पालनीं प्रजासु....

(D) श्रियः पतिः श्रीमति शासितुं जगत्....

25. सांख्यदर्शनानुसारं 'करणं' कतिविधम् ?

(A) अष्टविधम् (08)

(B) दशविधम् (10)

(C) त्रयोदशविधम् (13)

(D) षोडशविधम् (16)

26. 'उपकृष्णम्' इति समस्ते पदे किं सूत्रं प्रवृत्तम् ?

(A) यथाऽसादृश्ये

(B) अव्ययीभावे चाकाले

(C) अव्ययीभावश्च

(D) यावदवधारणे

27. 'न प्रभातरलं ज्योतिरुदेति वसुधातलात्' इतीयमुक्तिरस्ति

(A) प्रियंवदायाः

(B) अनसूयाया

(C) दुष्यन्तस्य

(D) विदूषकस्य

28. तुमुन्-प्रत्ययविधिसूत्रमस्ति-

(A) काल-समय-वेलासु

(B) युवारनाकौ

(C) पुवः संज्ञायाम्

(D) सनाशंसभिक्ष

29. 'वाक्यं रसात्मकं काव्यम्'- इतीदं लक्षणं क आचार्यः कृतवान् ?

(A) दण्डी

(B) पण्डितराजो जगन्नाथः

(C) महिमभट्टः

(D) विश्वनाथ कविराजः

30. उपपदसमासस्य उदाहरणमस्ति

(A) कुम्भकारः

(B) प्राचार्यः

(C) युधिष्ठिरः

(D) चिन्मात्रम्

31. 'वैदी' इत्यत्र कः स्त्रीप्रत्ययः प्रयुक्तः ?

(A) ङीप्

(B) ङीष्

(C) ङीन्

(D) टाप्

32. श्रीकेशवमिश्रस्य मते साक्षात्कारिणी प्रमा का ?

(A) आत्मजा

(B) इन्द्रियजा

(C) जन्मना

(D) कर्मणा

33. संस्कृतप्रायो नटाश्रय: वाग्व्यापार: किं कथ्यते ?

(A) आरभटीवृत्ति: (B) प्रस्तावना

(C) भारतीवृत्ति: (D) पताका

34. 'गौर्जल्पति' इतीदम् उदाहरणं कस्या: लक्षणाया: निदर्शकम् ?

(A) प्रयोजनवती गौणीसाध्यवसानालक्षण लक्षणाया:

(B) प्रयोजनवती गौणीसारोपालक्षणलक्षणाया:

(C) रूढिमती शुद्धासारोपालक्षणलक्षणाया:

(D) रूढिमती शुद्धासाध्यवसानालक्षणलक्षणाया:

35. जातस्य को ध्रुव: ?

(A) विवाह: (B) मृत्यु:

(C) गतिरोध: (D) विरोध:

36. अत्र शुद्धवाक्यमस्ति

(A) स: पितु: सह भ्रम्येत्

(B) दुर्जनात् शिष्यात् कोऽर्थ:

(C) स: जनकेन सह भ्रमति

(D) स: पुस्तक: पठति

37. 'पर्वतोऽयं वह्निमान्' –इतीदमुदाहरणं कस्य प्रमाणस्य ?

(A) प्रत्यक्षस्य (B) उपमानस्य

(C) अनुमानस्य (D) शाब्दस्य

38. 'सदूषणापि निर्दोषा सखरापि सुकोमला ।।
नमस्तस्मै कृता येन रम्या.... कथा ।।'
उपरिलिखितस्य पद्यस्य रिक्तस्थानं पूरयतु।

(A) रामायणी (B) कादम्बरी

(C) भागवती (D) साहसिकी

39. असर्पभूतायां रज्जौ सर्पारोपवत् कोऽस्ति?

(A) विषय: (B) अध्यारोप:

(C) मुमुक्षुत्वम् (D) तितिक्षा

40. कर्मवाच्ये परिवर्तयतु–'सा बालिका अजां नयति'

(A) तया बालिका अजा नयति।

(B) तया बालिकया अजा नीयते।

(C) सा बालिका अजा नीयते।

(D) सा बालिकया अजां नीयते।

41. माघ के शिशुपालवध नामक काव्य में बीस सर्ग हैं ; इत्यस्य वाक्यस्य शुद्ध: संस्कृतानुवादोऽस्ति–

(A) माघस्य शिशुपालवधे विंशतय: सर्गा: सन्ति।

(B) माघस्य शिशुपालवधे काव्ये विंशति: सर्गाणि सन्ति।

(C) माघस्य शिशुपालवधे इति नाम्न: काव्ये विंशतय: सर्गा विद्यन्ते।

(D) माघस्य शिशुपालवधनामके काव्ये विंशति सर्गा: सन्ति।

42. 'पदं हि सर्वत्र गुणैर्निधीयते'; ?– सूक्तिरियं कस्य ग्रन्थस्य वर्तते ?

(A) उत्तररामचरितस्य

(B) पञ्चतन्त्रस्य

(C) हितोपदेशस्य

(D) रघुवंशस्य

43. शुद्धं वाक्यम् अभिज्ञायताम्।

(A) ग्रामस्य परितो मृगा विचरन्ति।

(B) ग्रामस्य परितो मृग: विचरन्ति।

(C) ग्रामे परितं मृगा विचरन्ति।

(D) ग्रामं परितो मृगा विचरन्ति।

44. नलचम्पूकाव्यानुसारं 'प्रसन्ना: कान्तिहारिण्यो नानाश्लेषविचक्षणा वाच: मुखे गृहे स्त्रिय:' कस्मात् कारणात् भवन्ति ?

(A) भाग्यै:

(B) पुण्यै:

(C) सम्यगाचरणै:

(D) सम्पद्भि:

45. 'कुशल:' इति उदाहरणमस्ति

(A) अर्थविस्तारस्य

(B) अर्थसंकोचस्य

(C) अर्थापकर्षस्य

(D) एतेषां कस्यापि न

46. ङीप्प्रत्यययोगाद् निष्पन्नं पदमस्ति

(A) नदी (B) ब्राह्मणी

(C) तटी (D) भवानी

47. तर्कभाषानुसारेण परार्थानुमानवाक्यं भवति

(A) द्व्यवयम्

(B) त्र्यवयवम्

(C) चतुरवयम्

(D) पञ्चावयवम्

48. दुष्यन्त: कीदृश: नायक: ?

(A) धीरललित:

(B) धीरोदात्त:

(C) धीरप्रशान्त:

(D) धीरोद्धत:

49. सांख्यदर्शनानुसारं केषां वृत्ति: आलोचनमात्रम् इष्यते ?

(A) ज्ञानेन्द्रियाणाम् (B) कर्मेन्द्रियाणाम्

(C) तन्मात्राणाम् (D) पुरुषाणाम्

50. 'चित्रगु:' इति पदे समासोऽस्ति–

(A) कर्मधारय:

(B) बहुव्रीहि:

(C) द्विगु:

(D) अव्ययीभाव:

51. रूपकस्य को भेदोऽस्ति मृच्छकटिकम् ?

(A) नाटकम् (B) प्रकरणम्

(C) व्यायोग: (D) ईहामृग:

52. "वीणा हि नाम असमुद्रोत्थितं रत्नम्" – इत्युक्ति: कस्य ?

(A) विदूषकस्य (B) शकारस्य

(C) चारुदत्तस्य (D) रेभिलस्य

53. काव्यप्रकाशाभिमतम् अवरं काव्यं किम् ?

(A) गुणरहितम्

(B) समासरहितम्

(C) अलङ्काररहितम्

(D) व्यङ्ग्यरहितम्

54. पुरुषचेतनायाः अस्तित्वसिद्धिनिमित्तं वाक्यमस्ति–
(A) शक्तस्य शक्यकरणात्
(B) तत्र जरामरणकृतं दुःखं प्राप्नोति चेतनः
(C) सूक्ष्मा मातापितृजाः सह प्रभूतैस्त्रिधा
(D) भोक्तृभावात् कैवल्यार्थं प्रवृत्तेश्च

55. 'भवितव्यानां द्वाराणि भवन्ति सर्वत्र'–
इतीयं सूक्तिः कुत्र वर्तते ?
(A) मृच्छकटिके
(B) अभिज्ञानशाकुन्तले
(C) शिशुपालवधस्य प्रथमे सर्गे
(D) कादम्बरीकथामुखे

56. डिम्भादेः स्वक्रियारूपादिवर्णने अलङ्कारो भवति
(A) स्वभावोक्तिः (B) परिसंख्या
(C) उत्प्रेक्षा (D) अतिशयोक्तिः

57. मम्मटानुसारेण काव्यलक्षणमस्ति
(A) शब्दार्थौ सहितौ काव्यम्
(B) वाक्यं रसात्मकं काव्यम्
(C) तददोषौ शब्दार्थौ सगुणावनलङ्कृती पुनः क्वापि
(D) रमणीयार्थप्रतिपादकः शब्दः काव्यम्

58. "तत्रापि चतुर्थोऽङ्कस्तत्र श्लोकचतुष्टयम्" इत्यस्मिन् कथने कस्य ग्रन्थस्य प्रशंसा अस्ति ?
(A) अभिज्ञानशाकुन्तलस्य
(B) रघुवंशस्य
(C) मेघदूतस्य
(D) ऋतुसंहारस्य

59. शिशुपालवधमहाकाव्यस्य प्रथमे सर्गे किं छन्दः प्रयुक्तम् ?
(A) अनुष्टुप्
(B) वसन्ततिलका
(C) उपजातिः
(D) वंशस्थम्

60. प्रातिपदिकार्थमात्रे प्रथमाया उदाहरणमस्ति–
(A) उच्चैः
(B) तटः
(C) द्रोणो व्रीहिः
(D) एकः

61. विकासदृष्ट्या भाषा कया समा ?
(A) पर्वतः (B) नदी
(C) सागरः (D) वृक्षः

62. 'देवीं वाचमजनयन्त देवाः' – इति केन भाषोत्पत्तिसिद्धान्तेन सम्बद्धः ?
(A) सङ्केत सिद्धान्तेन
(B) अनुकरण सिद्धान्तेन
(C) दैवी सिद्धान्तेन
(D) सङ्गीत सिद्धान्तेन

63. मृच्छकटिके वसन्तसेनायाः दर्शनं सर्व प्रथमं कस्मिन्नङ्के भवति ?
(A) प्रथमे
(B) द्वितीये
(C) तृतीये
(D) चतुर्थे

64. यत्र क्तिन्-प्रत्ययोऽस्ति-
(A) वैदिक:
(B) राष्ट्रिय:
(C) कृति:
(D) वन्दमान:

65. 'रजोजुषे जन्मनि सत्त्ववृत्तये'- अस्मिन् श्लोकांशे 'रजोजुषे' इति पदे विभक्तिरस्ति
(A) चतुर्थी
(B) प्रथमा
(C) द्वितीया
(D) सप्तमी

66. सांख्यानुसारं विपर्ययस्य कति भेदा भवन्ति ?
(A) पञ्च
(B) अष्टाविंशति:
(C) नव
(D) अष्टौ

67. 'अग्निरनुष्ण: कृतकत्वाज्जलवत्' अत्र 'कृतकत्वात्' कीदृशो हेत्वाभास: ?
(A) कालात्ययापदिष्ट:
(B) अनैकान्तिक:
(C) उपाधित्वासिद्ध:
(D) व्याप्यत्वासिद्ध:

68. ध्वनिपरिवर्तनस्याऽभ्यन्तरकारणमस्ति
(A) मुखसुखम्
(B) शयनसुखम्
(C) मातृसुखम्
(D) अर्थसुखम्

69. अभिधामूला-व्यञ्जनाया: लक्षणमस्ति-
(A) अनेकार्थस्य शब्दस्य संयोगाद्यैर्नियन्त्रिते
(B) लक्षणोपास्यते यस्य कृते तत्तु प्रयोजनम्
(C) विभावेनानुभावेन व्यक्त: संचारिणा तथा
(D) तात्पर्याख्यां वृत्तिमाहु: पदार्थान्वयबोधने

70. प्रासङ्गिकं प्रदेशस्थं चरितं किं कथ्यते ?
(A) प्रकरी
(B) पताका
(C) अर्थप्रकृति:
(D) नियताप्ति:

71. श्रीमद्भगवद्गीताया: कस्मिन्नध्याये भगवतो विभूतयो वर्णिता: सन्ति ?
(A) सप्तमे
(B) नवमे
(C) द्वादशे
(D) दशमे

72. रिक्तस्थानस्य पूर्ति: क्रियताम् -
'क्रमादमुं नारद इत्यबोधि ________ ।।'
(A) य:
(B) स:
(C) न:
(D) क:

73. नलचम्पू-काव्यस्यान्यनाम किमस्ति ?
(A) रामायण चम्पू
(B) उदयन सुन्दरीकथा
(C) भागवतचम्पू
(D) नल-दमयन्ती-कथा

74. 'अन्तरान्तरेण युक्ते' इति सूत्रेण विभक्तिर्विधीयते-
(A) द्वितीया
(B) तृतीया
(C) पञ्चमी
(D) सप्तमी

75. साहित्यदर्पणानुसारं लक्षणायाः कियन्तो भेदाः ?
(A) षट्
(B) षोडश
(C) चत्वारिंशत्
(D) अशीति

76. अतिशयोक्ति-अलंकारस्य लक्षणमस्ति-
(A) सिद्धत्वेऽध्यवसायस्य....
(B) स्वगुणत्यागादत्युत्कृष्टगुणग्रहः....
(C) उक्त्वा चात्यन्तमुत्कर्ष....
(D) मीलितं वस्तुनो गुप्तिः केनचित्....

77. डुकृञ् करणे (कृ) धातुः कस्य गणस्य वर्तते ?
(A) रुधादिगणस्य
(B) तनादिगणस्य
(C) दिवादिगणस्य
(D) अदादिगणस्य

78. अभिज्ञानशाकुन्तले 'कामी स्वतां पश्यति'-इत्युक्तिः कस्य ?
(A) विदूषकस्य
(B) राज्ञः
(C) महर्षेः कण्वस्य
(D) शारद्वतस्य

79. शबरसेनापतेः नाम किम् आसीत् ?
(A) माधव्यः
(B) मान्धाता
(C) माल्यवान्
(D) मातङ्गः

80. वेदान्तमतमस्ति
(A) मन आत्मेति
(B) बुद्धिरात्मेति
(C) अज्ञानमात्मेति
(D) प्रत्यक्चैतन्यमात्मेति

81. श्रीमद्भगवद्गीतायाः कस्मिन्नध्याये भगवान् स्वकीयाम् अष्टधां प्रकृतिं प्रोक्तवान् ?
(A) षष्ठे
(B) चतुर्थे
(C) सप्तमे
(D) पञ्चमे

82. "चकासतं चारूचमूरूचर्मणा"-अत्र चमूरू-पदेन कस्य पशोः संकेतः ?
(A) धेनोः
(B) मृगस्य
(C) कुक्कुटस्य
(D) मयूरस्य

83. दरिद्रस्य किं शून्यम् ?
(A) गृहम्
(B) क्षेत्रम्
(C) सर्वम्
(D) उपवनम्

84. श्रोत्रेन्द्रियेण शब्दस्य प्रत्यक्षं ज्ञानं भवति-
(A) संयोगसन्निकर्षेण
(B) समवायसन्निकर्षेण
(C) संयुक्तसमवायसन्निकर्षेण
(D) विशेष्यविशेषणभावसन्निकर्षेण

85. 'इत्थंभूतलक्षणे' इति सूत्रेण विभक्तिर्विधीयते
(A) द्वितीया
(B) तृतीया
(C) पञ्चमी
(D) सप्तमी

86. विशुद्धसत्त्वप्रधानया- अज्ञानसमष्ट्योपहितं चैतन्यं किं कथ्यते ?
(A) अव्यक्तमन्तर्यामीजगत्कारणमीश्वरः
(B) प्राज्ञः
(C) जीवः
(D) उपाधिमुक्तं विशुद्धचैतन्यम्

87. वेदान्तसारे स्थूलशरीरस्य संज्ञा अस्ति
(A) अन्नमयकोश:
(B) प्राणमयकोश:
(C) मनोमयकोश:
(D) विज्ञानमयकोश:

88. सांख्यशास्त्रं कस्मात् श्रेयान् ?
(A) ईश्वरानुग्रहात्
(B) विहितकर्मणामनुष्ठानात्
(C) अद्वयतत्त्वस्य ज्ञानात्
(D) व्यक्ताव्यक्तज्ञविज्ञानात्

89. कार्याकार्य व्यवस्थितौ किं प्रमाणम् ? (श्रीकृष्णानुसारम्)
(A) लोक:
(B) शास्त्रम्
(C) भार्यावचनम्
(D) स्वकीयं मन:

90. "पिशङ्गमौञ्जीयुजमर्जुनच्छविं वसानमेणाजिनमञ्जनद्युति"–
अत्र वसानमित्यस्मिन् पदे क: प्रत्यय: ?
(A) ण्वुल्
(B) ल्यप्
(C) अण्
(D) शानच्

91. कादम्बरीमतिरिच्य बाणभट्टस्य द्वितीयं गद्यकाव्यं किम् ?
(A) दशकुमारचरितम्
(B) वासवदत्ता
(C) हर्षचरितम्
(D) तिलकमञ्जरी

92. साहित्यदर्पणे 'नवपलाशपलाशवनं पुरः
स्फुटपरागपरागतपङ्कजम्.'
इति श्लोको निर्दिष्ट उदाहरणरूपेण–
(A) अनुप्रासस्य
(B) यमकस्य
(C) श्लेषस्य
(D) वक्रोक्ते:

93. दा–धातु लङ्लकारे, प्रथमपुरुषे, बहुवचने अस्ति–
(A) अदत्त
(B) अददा:
(C) अदुदु:
(D) अदत्ताम्

94. नास्ति अपादानसंज्ञाविधायकं सूत्रम्
(A) भीत्रार्थानां भयहेतु:
(B) पराजेरसोढ:
(C) वारणार्थानामीप्सित:
(D) स्पृहेरीप्सित:

95. नर्तकी–पदे प्रत्ययोऽस्ति–
(A) सामान्यप्रकारेण ङीष्
(B) विकल्पेन ङीष्
(C) सामान्य प्रकारेण ङीन्
(D) विकल्पेन ङीन्

96. 'बलाबलेपादधुनाऽपि पूर्ववत्
प्रबाध्यते तेन जगज्जिगीषुणा।।
सतीव योषि प्रकृति: सुनिश्चला
पुमांसमभ्येति भवान्तरेष्वपि ।।'
– इत्यत्र कोऽलङ्कार: ?
(A) अर्थान्तरन्यास:
(B) दीपकम्
(C) दृष्टान्त:
(D) विशेषोक्ति:

97. रसनिष्पत्तिविषये अभिनवगुप्तस्य सिद्धान्तोऽस्ति

(A) रसानुमितिवाद:

(B) रसोत्पत्तिवाद:

(C) भुक्तिवाद:

(D) रसाभिव्यक्तिवाद:

98. 'नादेयम्' इत्यत्र प्रयुक्त: प्रत्यय: क: ?

(A) त्यक् (B) ढक्

(C) ठक् (D) यत्

99. "पृथुकार्तस्वरपात्रं भूषितनि:शेषपरिजनं देव।
विलसत्करेणुगहनं सम्प्रति सममावयो: सदनम्।।"
इतिश्लोके अलङ्कारोऽस्ति

(A) यमकम्

(B) श्लेष:

(C) वक्रोक्ति:

(D) स्वभावोक्ति:

100. अत्र अशुद्धवाक्यमस्ति-

(A) अलं विवादेन

(B) कर्णेन बधिर:

(C) कस्मै बालकाय फलं रोचते

(D) एतस्मै ब्राह्मणं धनं ददाति

101. 'कदापि सत्पुरुषा: शोकवक्तव्या न भवन्ति; कस्येयमुक्ति: ?

(A) विदूषकस्य

(B) दुष्यन्तस्य

(C) शार्ङ्गरवस्य

(D) शारद्वतस्य

102. 'राघवपाण्डवीयम्' कस्य रचनाऽस्ति ?

(A) सोमेश्वरस्य

(B) वेदान्तदेशिकस्य

(C) रत्नाकरस्य

(D) कविराजस्य

103. अनर्घराघवनाटकं रचितवान्

(A) भवभूति:

(B) भास:

(C) विशाखदत्त:

(D) मुरारि:

104. क्त-प्रत्ययविधिसूत्रमस्ति

(A) पुंसि संज्ञायां प्राचेण

(B) नपुंसके भावे

(C) ण्यास-श्रन्थो

(D) गुरोश्च हल:

105. 'लिम्पतीव तमोऽङ्गानि वर्षतीवाञ्जनं नभ:'-
इत्यत्र कोऽलङ्कार: ?

(A) रूपकम् (B) उत्प्रेक्षा

(C) उपमा (D) यमकम्

106. उपमानोपमेययोरभेदे सति अलङ्कारो भवति

(A) उपमा

(B) रूपकम्

(C) उत्प्रेक्षा

(D) सन्देह:

107. 'शुष्क:' इति पदस्य निष्पत्तिरस्ति
(A) क्तप्रत्यययोगात्
(B) क्तवतुप्रत्यययोगात्
(C) शतृप्रत्यययोगात्
(D) शानच्प्रत्यययोगात्

108. "स्फुटोपमं भूतिसितेन शम्भुना" इत्यस्मिन् वाक्ये कस्य संकेत: ?
(A) नारदस्य
(B) कण्वस्य
(C) विश्वामित्रस्य
(D) वशिष्ठस्य

109. रामायणे शबरीवृत्तान्त: क: ?
(A) पताका
(B) पताकास्थानकम्
(C) प्रकरी
(D) प्रवेशक:

110. नलचम्पूकाव्यस्य कर्ता क: ?
(A) बाणभट्ट: (B) आशाधरभट्ट:
(C) त्रिविक्रमभट्ट: (D) महिमभट्ट:

111. 'पारावारीण:' इत्यत्र क: प्रत्यय: ?
(A) अण् (B) ढ्
(C) घ (D) ख

112. बुद्धचरितमहाकाव्यस्य प्रणेता आसीत्
(A) अश्वघोष: (B) श्रीहर्ष:
(C) बिल्हण: (D) बुद्धघोष:

113. कस्य नाटकस्य मङ्गलाचरणे अष्टविधशिवस्वरूपम् ?
(A) उत्तररामचरितस्य मंगलाचरणे
(B) मुद्राराक्षसस्य मंगलाचरणे
(C) अभिज्ञानशाकुन्तलस्य मंगलाचरणे
(D) मालविकाग्निमित्रस्य मंगलाचरणे

114. अनीयर्प्रत्यययोगाद् निष्पन्नं पदमस्ति
(A) चेयम् (B) चेतव्य:
(C) चयनीय: (D) एधितव्यम्

115. भूधातो: लुट् लकार-प्रथमपुरुषैकवचनस्य रूपमस्ति
(A) भविष्यति (B) भविता
(C) अभविष्यत् (D) भूयात्

116. श्रिय: पति: श्रीमति शासितुमित्यस्मिन् श्लोकांशे "श्रिय: पति: " अस्ति-
(A) पार्वत्या: पति:
(B) मेनकाया: पति:
(C) लक्ष्म्या: पति:
(D) शकुन्तलाया: पति:

117. 'धनञ्जय:' कीदृशो वायुप्रकार:?
(A) क्षुत्कर:
(B) पोषणकर:
(C) उद्गिरणकर:
(D) जृम्भणकर:

118. सांख्यकारिकानुसारेण सृष्टिर्भवति

(A) ईश्वरसङ्कल्पात्

(B) स्वभावात्

(C) प्रकृतिपुरुषसंयोगात्

(D) परमाणुसंयोगात्

119. "भवच्छिदस्त्र्यम्बकपादपांसव:" इति पदे कस्य जय–जयकार:–

(A) इन्द्रदेवस्य

(B) अग्निदेवस्य

(C) शिवस्य

(D) विष्णो:

120. 'किमिव हि मधुराणां मण्डनं नाकृतीनाम्' इतीयं सूक्तिर्वर्तते

(A) उत्तररामचरिते

(B) अभिज्ञानशाकुन्तले

(C) मेघदूते

(D) नीतिशतके

121. बाणभट्टस्य पितुर्नाम आसीत्

(A) वात्स्यायन:

(B) कुबेर:

(C) अर्थपति:

(D) चित्रभानु:

122. 'वयं फलानि खादाम:' इत्यस्य वाक्यस्य कर्मवाच्ये रूपं भवति।

(A) मया फलानि खाद्यन्ते।

(B) अस्माभि: फलानि खाद्यन्ते।

(C) अस्मभ्यं फलानि खाद्यन्ते।

(D) अस्माभि: फलं खाद्यते।

123. सांख्यदर्शनस्य सिद्धान्तोऽस्ति

(A) सत्कार्यवाद:

(B) असत्कार्यवाद:

(C) विवर्तवाद:

(D) आरम्भवाद:

124. सांख्यदर्शने स्वीकृतानां तत्त्वानां संख्या कियती ?

(A) अष्टादश (18)

(B) एकविंशति: (21)

(C) द्वाविंशति: (22)

(D) पञ्चविंशति: (25)

125. 'रोहिणी' इत्यत्र क: प्रत्यय: ?

(A) ङीप्

(B) ङीष्

(C) ङीन्

(D) इनि

SEAL

3. प्रश्न-पुस्तिका में किसी विसंगति के अतिरिक्त, किसी भी स्थिति में अभ्यर्थी को कोई दूसरी प्रश्न-पुस्तिका नहीं दी जाएगी। अभ्यर्थी को प्रश्न-पुस्तिका को उपयोग में लाने और OMR उत्तर-पत्रक को पूरित करने में सावधानी बरतनी चाहिए।

4. अभ्यर्थी को 125 प्रश्नों के उत्तर भरने हैं। सभी प्रश्न अनिवार्य हैं। गलत उत्तर के लिए नकारात्मक अंक नहीं दिये जायेंगे।

5. OMR उत्तर-पत्रक को भरने के पूर्व अभ्यर्थी उत्तर-पत्रक पर मुद्रित महत्वपूर्ण निर्देशों को ध्यानपूर्वक पढ़ें।

6. अभ्यर्थी को दिए गए चार विकल्पों में से एक सबसे अधिक उपयुक्त विकल्प का चयन कर OMR उत्तर-पत्रक में दिए गए निर्देशानुसार भरना है।

7. किसी भी परिस्थिति में प्रश्न-पुस्तिका का कोई भी कागज अलग नहीं करना है।

8. अभ्यर्थी परीक्षा भवन में **प्रवेश पत्र** के अतिरिक्त सादा या लिखा कोई अन्य कागज नहीं लाएँगे। यदि कोई अभ्यर्थी कोई अतिरिक्त कागज, नोट, पुस्तक, कैलकुलेटर, स्लाइड रूल, मोबाइल फोन आदि अपने साथ परीक्षा भवन में रखे पाया जाता है, तो उसे अनुचित साधन प्रयोग के अन्तर्गत दण्डित किया जा सकता है।

9. सभी रफ कार्य को केवल प्रश्न-पुस्तिका के अन्दर ही करना है।

10. केवल **काला** बॉल पेन उत्तर भरने के लिए प्रयोग करें।

3. No second question booklet shall be given to any candidate under any circumstances except any discrepancy in question booklet. The candidate should be careful in handling the question booklet and filling the OMR answer sheet.

4. A candidate has to attempt 125 questions. All the questions are compulsory. There is no negative marking for wrong answer.

5. Before filling the OMR answer sheet, the candidate should read carefully the important instructions given on answer sheet.

6. The candidate has to choose best suitable alternative out of the four alternatives given and mark on the OMR answer sheet according to the instructions given in the answer sheet.

7. In no case any paper from the question booklet should be separated.

8. The candidate shall not bring any loose paper, whether written or blank, except the **admit card**, inside the examination hall. If any candidate is found having any loose paper, notes, books, calculator, slide rule, mobile phone etc. with him/her in the examination hall, he/she will be liable to be punished for use of unfair means.

9. All rough work should be done inside the question booklet only.

10. Only use **black** ball pen for filling answers.

SEAL



SEAL